This question paper contains 4 printed pages.

Roll No. ___________

S. No. of Question Paper : 1135A

Unique Paper Code : 2132101201

Name of the Paper : Classical Sanskrit Literature (Prose), DSC

Name of the Course : B.A. (H) Sanskrit, NEP UGCF

Semester : II

Duration: 3 Hours Maximum Marks: 90

**Instruction for Candidates**

1. Write your Roll No. on the top immediately on receipt of the question paper.
2. Unless otherwise required in a question, answers should be written either in **Sanskrit** or in **Hindi** or in **English**, but the same medium should be used throughout the paper.
3. Answer **All** questions.

**छात्रों के लिए निर्देश**

1. इस प्रश्न-पत्र के मिलते ही उपर दिए गए निर्धारित स्थान पर अपना अनुक्रमांक लिखिए।
2. अन्यथा आवश्यक न होने पर, इस प्रश्न-पत्र का उत्तर **संस्कृत** या **हिन्दी** या **अंग्रेजी** किसी एक भाषा में दीजिए, परन्तु सभी प्रश्नों का माध्यम एक ही होना चाहिए।
3. **सभी** प्रश्नों के उत्तर दीजिए।

1. निम्नलिखित में से किन्हीं **चार** का अनुवाद कीजिए : 4 x 5 = 20
Translate any **four** of the following:

(i) अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य। कुसुमशरशरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम् । अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं चाविनयस्य। चन्दनप्रभवो न दहति किमनलः, किं वा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा।

(ii) अप्रत्ययबहुला च दिवसान्तकमलमिव समुपचितमूल-दण्ड-कोषमण्डलमपि मुञ्चति भूभुजम्। लतेव विटपकानध्यारोहति । गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला, दिवसकरगतिरिव

प्रकटितविविध–संक्रान्तिः । पातालगुहेव तमोबहुला । हिडिम्बेव भीमसाहसैकहार्य्यहृदया। प्रावृडिवाचिरद्युतिकारिणी ।

(iii) देव, दैवानुग्रहेण यदि कश्चिद् भाजनं भवति विभूतेस्तमकस्मादुच्चावचैरुपप्रलोभनैः **कदर्थयन्तः** स्वार्थं साधयन्ति धूर्ताः । तथाहि । केचित्प्रेत्य किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य **मुण्डयित्वा** शिरो बद्ध्वा दर्भरज्जुभिरजिनेनाच्छाद्य नवनीतेनोपलिप्यानशनं च शाययित्वा सर्वस्वं स्वीकरिष्यन्ति । तेभ्योऽपि घोरतराः पाषण्डिनः पुत्रदारशरीरजीवितान्यपि मोचयन्ति ।

(iv) येऽप्युपदिशन्ति- 'एवमिन्द्रियाणि जेतव्यानि, एवमरिषड्वर्गस्त्याज्यः, सामादिरुपाय- वर्गः स्वेषु परेषु चाजस्त्रं प्र**योज्यः**, सन्धिविग्रहचिन्तयैव नेयः कालः, स्वल्पोपि सुखस्यावकाशो न देयः' इति, तैरप्येभिर्मन्त्रिवकर्युष्मत्तश्चौर्यार्जितं धनं दासीगृहेष्वेव भुज्यते । के चैते वराकाः । येऽपि मन्त्रकर्कशास्तन्त्रकर्त्तारः शुक्राङ्गिरसविशालाक्षबाहुदन्तिपुत्रपराशर- प्रभृतयस्तैः किमरिषड्वर्गो जितः कृतं वा **तैः** शास्त्रानुष्ठानम् ।

(v) यावदेष ब्रह्मचारी बटुरलिपुञ्जमुद्धूय **कुसुमकोरकान**वचिनोतिः तावत् तस्यैव सतीर्थोऽपरस्तत्समानवयाः कस्तूरिका-रेणु-रुषित इव श्यामः, चन्दनचर्चित-भालः, कर्पूरागुरु-क्षोदच्छुरित-वक्षो-बाहु-दण्डः, सुगन्धपटलैरुन्निद्रयन्निव निद्रा-मन्थराणि कोरकनिकुरम्बकान्तरालसुप्तानि मिलिन्द–वृन्दानि झटिति समुपसृत्य निवारयन् गौरबटुमेवमवादीत् ।

(vi) तस्मिन् पूज्यमाने, "योगिराडुत्थित" इति "आयात", इति च आकर्ण्य कर्णपरम्पराया बहवो **जनाः** परितः स्थिताः । सुघटितं शरीरम् सान्द्रां जटाम्, विशालान्यंगानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीराञ्च वाचं वर्णयन्तश्चकिता इव सञ्जाताः ।

2. निम्नलिखित में से किन्हीं **दो** की सप्रसंग व्याख्या कीजिए : (2x6=12)

Explain any **two** of the following with reference to the context:

(i) भवादृशा एव भवन्ति भाजनानि उपदेशानाम् । अपगतमले हि **मनसि** स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेन उपदेशगुणाः । गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु, करिण इव

शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति । **हरति** अतिमलिनमप्यन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव।

(ii) एतदाकर्ण्य 'स्थान एव गुरुभिरनुशिष्टम्। तथा **क्रियते'** इत्यन्तः पुरमविशत्। तां च वार्तां पार्थिवेन प्रमदासंनिधौ प्रसङ्गेनोदीरिता**मुपनिशम्य** समीपोपविष्टश्चिन्ताकुलवृत्तिकुशलः, प्रसादवित्तो गीतनृत्यवाद्यादिष्वबाह्यो बाह्यनारीपरायणः, पटुरयन्त्रितमुखो, बहुभङ्गिविशारदः, परमर्मान्वेषणपरः, परिहासयिता, परिवादरुचिः, पैशुन्यपण्डितः, सचिवमण्डलादप्युत्कोचहारी, सकलदुर्नयोपाध्यायः, कामतन्त्रकर्णधारः, कुमारसेवको विहारभद्रो नाम स्मितपूर्वं व्यज्ञापयत् ।

(iii) अथ सोऽप्याचचक्षे-'देव' मयापि परिभ्रमता विध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित् कूपाभ्याशेऽष्टवर्षदेशीयो दृष्टः। स च त्रासगद्गदमगदत्- 'महाभाग, क्लिष्टस्य मे क्रियतामार्य! साहाय्यकम् । अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निह कूपे कोऽपि निष्कलो ममैकशरणभूतः **पतितः** ।

(iv) अहो ! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवातिः, सन्ध्योपासन-समयोऽयमस्मद्गुरुचरणानाम्, तत्सपदि अवचिनोमि कुसुमानि" इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं **विधाय**, पुष्पावचयं क कर्तुमारेभे ।

3. शुकनासोपदेश में चित्रित लक्ष्मी के स्वरूप का वर्णन कीजिए । 11
Explain the nature of Lakshmi on the basis of *Shuknasopadesha*.

अथवा / OR

'बाणोच्छिष्टं जगत्सर्वम्' इस कथन की समीक्षा कीजिए ।

Critically examine the statement- 'बाणोच्छिष्टं जगत्सर्वम्'.

4. ऐतिहासिक गद्यकाव्य के रूप में शिवराजविजयम् की समीक्षा कीजिए । 11
Give review on *Shivarajavijayam* as a historical prose literature.

अथवा / OR

शिवराजविजयम् के आधार पर ब्रह्मचारी गुरु की कुटिया के मनोरम दृश्य का वर्णन कीजिए |

Describe the panoramic view of Brahmachari Guru's hut on the basis *Shivarajavijayam*

5. विश्रुतचरितम् के अनुसार राजाओं की दिनचर्या अपने शब्दों में वर्णित कीजिए | 11

Explain the daily activities of kings according to *Vishruitcharitam.*

अथवा / OR

'दण्डिनः पदलालित्यम्' इस कथन की सोदाहरण समीक्षा कीजिए ।

Critically examine the statement- 'दण्डिनः पदलालित्यम्' with examples.

6. प्रश्न संख्या 1 तथा 2 के किन्हीं पाँच रेखांकित पदों पर व्याकरणात्मक टिप्पणी लिखिए । (1×5=5)
Write grammatical note on any five of the underlined words in question 1 and 2.

7. संस्कृत गद्यकाव्य की विकास यात्रा पर विस्तृत निबन्ध लिखिए । 10
Write a detailed essay on the development of Sanskrit Prose Literature.

अथवा / OR

निम्नलिखित में से किन्हीं **दो** पर टिप्पणी लिखिए:

Write notes on any **two** of the following:

हर्षचरित, पुरुषपरीक्षा, पञ्चतन्त्र, कादम्बरी

Harshcharit, Purushpariksha, Panchtantra, Kadambari

8. निम्नलिखित में से किन्हीं **दो** पर टिप्पणी लिखिए जिनमें से एक **संस्कृत** में होनी चाहिए: (2×5=10)

Write notes on any **two** of the following, one of which should be in **Sanskrit**:

योगिराज, मृगतृष्णा, षड्गुण, चन्द्रापीड, क्षीरसागर ।